तैलैर्द्दैः कारयेन्मुद्रामसङ्कलितसङ्गताम् ॥
एषु स्वराः स्मृताः सौम्याः सर्व्वाः सौराः शुभोदयाः ।
आग्नेया यापकाः सर्व्वे सोमसूर्य्याग्निदेवताः ॥
स्वराः षोड़श विख्याताः सर्व्वास्ते पञ्चविंशतिः ।
यापका इश ते कामधनधर्म्मप्रदायिनः ॥
साष्टं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात्ततः ।
तस्यां सम्पातयेन्मन्त्री सर्पिषा पूर्व्वसंख्यया ॥
निःक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना ।
आवाह्य पूजयेद्देवीमुपचारैर्व्विधानतः ॥
अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः ।
इयं मुद्रा क्षुद्ररोगविषज्वरविनाशिनी ॥
बालचौरव्याघ्रादिभ्यो रक्षां कुर्य्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः ॥
मन्त्रसिद्धिकरी पुंसां चतुर्व्वर्गफलप्रदा ।
धारयन्मनुजो नित्यं देवतुल्यो भवेद्भुवि ॥"
इति तन्त्रसारः ॥

त्रिवर्गः, पुं, (त्रयाणां वर्गः समूहः ।) धर्म्मकामार्थाः । इत्यमरः । २ । ७ । ५८ ॥ (यथा, महाभारते । १ । १८१ । ३ ।
"यो हि कारणतः क्रोधं संजातं क्षन्तुमर्हति ।
नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥")
त्रिफला । त्रिकटु । (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
"भागान् दशैतान् विभजेद्विधिज्ञो
दत्त्वा त्रिवर्गं मधुरस्य कृत्स्नम् ॥")
वृद्धिस्थानक्षयाः । (यथा, महाभारते । १२ । ६९ । ६६ ।
"त्रिवर्गञ्चापि यः प्रोक्तस्तमिहैकमनाः शृणु ।
क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गः परमस्तथा ॥")
सत्त्वरजस्तमांसि । इति मेदिनी । गे, १७ ॥ सुनीतिः । इति शब्दरत्नावली ॥

त्रिवर्णकं, क्ली, (त्रयो वर्णाः सन्त्यवयवाहौ यस्य । कप् ।) गोक्षुरकः । त्रिफला । (यथा, सुश्रुते । १ । ४४ ।
"त्रिवर्णकचूर्णयुक्तमेतद्
गुड़ेन लिह्यादनवेन चूर्णम् ॥")
त्रिकटु । इति मेदिनी । के, १६२ ॥ (ब्राह्मणादिवर्णत्रये, श्यामरक्तपीतात्मके वर्णत्रये च ।)

त्रिवर्णिका, स्त्री, (त्रीणि वर्णानि वयो यस्याः सा त्रिवर्णा । ततः स्वार्थे कन् । टापि अत इत्वञ्च ।) शिखायणी । त्रिवर्णा गौः । इति हेमचन्द्रः । ४ । ३३८ ॥

त्रिवलिः, स्त्री, (त्रिगुणिता वलिस्तरङ्गः ।) जठरावयवविशेषः । (यथा, देवीभागवते । ५।८।७१ ।
"ऐन्द्रेणाग्नितेजसा मध्यं जातं त्रिवलिसंयुतम् ॥"
कृदिकारादिति पक्षे ङीपि त्रिवलीत्यपि ।) यथा,
"त्रिवलीवलयोपेताम् ॥"
इति जगद्धात्रीध्यानम् ॥

त्रिविक्रमः, पुं, (त्रीन् लोकान् विशेषेण क्रामति व्याप्नोतीति । वि+क्रम+अच् । यद्वा, त्रिषु लोकेषु बलिवञ्चनार्थं भूर्भुवःस्वर्गेषु क्रमः पादन्यासो यस्य ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा, महाभारते । १३ । १४९ । ६९ ।
"आनन्दो नन्दनो नन्दः सत्यधर्म्मा त्रिविक्रमः ॥"
"त्रयो विक्रमास्त्रिषु लोकेषु यस्य स त्रिविक्रमः ।
'त्रीणि पदानि विचक्रमे' इति श्रुतेः ।
'त्रिरित्येव त्रयो लोकाः कीर्त्तिता मुनिसत्तमैः ।
क्रामांस्तु ततः सर्व्वांस्त्रिविक्रमोऽसि जनार्द्दन ॥'
इति हरिवंशे ॥" इति शाङ्करभाष्यम् ॥)

त्रिविष्टपं, क्ली, (तृतीयं विष्टपं भुवनम् ।) त्रिपिष्टपम् । स्वर्गः । इत्यमरटीकायां स्वामी ॥ (यथा, रामायणे । २ । १०८ । ९ ।
"विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥")
त्रिभुवनञ्च ॥

त्रिविष्टपसत्, [द्] पुं, (त्रिविष्टपे स्वर्गे सीदतीति । सद्+क्विप् ।) त्रिपिष्टपसत् । (देवः ।) इति हलायुधः ॥

त्रिवीजः, पुं, (त्रीणि त्रीणि वीजानि यस्य ।) श्यामाकः । इति राजनिर्घण्टः ॥

त्रिवृत्, स्त्री, (त्रीनवयवान् वृणोतीति । वृ+क्विप् तुक् च ।) लताविशेषः । तेउड़ी इति भाषा । तत्पर्य्यायः । सर्व्वानुभूतिः २ सुवहा ३ त्रिपुटा ४ त्रिवृता ५ त्रिभण्डी ६ रेचनी ७ । इत्यमरः । २ । ४ । १०८ ॥ सवहा ८ सरणा ९ सरला १० त्रिपुटी ११ रोचनी १२ । एते त्रिवृता सामान्ये शुक्लत्रिवृतायामिति केचित् । इति भरतः ॥ मालविका १३ मसूरी १४ श्यामा १५ अर्द्धचन्द्रा १६ विदला १७ सुषेणी १८ कालिङ्गिकम् १९ कालमेषी २० काली २१ त्रिवेला २२ त्रिवृत्तिका २३ । इति राजनिर्घण्टः ॥ श्वेता २४ सारा २५ । इति शब्दरत्नावली ॥
कृष्णायाः पर्य्यायः । श्यामा १ पालिन्दी २ सुषेणिका ३ काला ४ मसूरविदला ५ अर्द्धचन्द्रा ६ कालमेषिका ७ । इत्यमरः । २ । ४ । १०८ ॥ पालिन्दी ८ कालमेषिका ९ । इति भरतः ॥ श्वेतायाः पर्य्यायः । त्रिवृत् १ दक्षाणी २ सुवहा ३ त्रिभण्डी ४ त्रिपुटा ५ ॥ अरुणायाः पर्य्यायः । वाप्रादनी १ कुटरणा २ निःसृता ३ त्रिवृता ४ अरुणा ५ । इति रत्नमाला ॥ सामान्यत्रिवृताया गुणाः । कटुत्वम् । उष्णत्वम् । कृमिश्लेष्मोदरार्त्तिकुष्ठकण्डुव्रणनाशित्वम् । विरेचने प्रशस्तत्वञ्च । इति राजनिर्घण्टः ॥ अरुणवर्णत्रिवृद्गुणाः । स्वादुत्वम् । कषायत्वम् । मृदुत्वम् । रेचनत्वम् । रूक्षत्वम् । कटुत्वम् । दोषपाके पित्तकफापहत्वञ्च ॥ अस्याश्वाप्यन्तरगुणा विज्ञेया त्रिवृता सिता । इति राजवल्लभः ॥
श्वेतत्रिवृद्गुणाः । विरेचनत्वम् । स्वादुत्वम् । उष्णत्वम् । वायुकारित्वम् । रूक्षत्वम् । पित्तज्वरश्लेष्मपित्तशोफोदरापहत्वञ्च ॥ कृष्णत्रिवृतागुणाः । श्वेताहीनगुणत्वम् । तीव्रत्वम् । विरेचनत्वम् । मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारित्वञ्च । इति भावप्रकाशः ॥ (त्रिभिर्युक्ते, त्रि । यथा, ऋग्वेदे । १ । ३४ । ९ ।
"क्व त्री चक्रा त्रिवृतो रथस्य ॥"
यथा च मनुः । २ । ४२ ।
"मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ॥")

त्रिवृत्करणं, क्ली, (त्रिवृतस्त्र्यवयवस्य करणं मिश्रीकरणम् ।) त्रित्वप्तेजसां मिश्रीकरणम् । यथा, "तेजोजलक्षितयः प्रत्येकं द्वेधा विभज्य एकस्मिन्नर्द्धे स्वेतरयोरर्द्धार्द्धं प्रक्षिपेत् ।" इति मोक्षधर्म्मटीकायां नीलकण्ठः ॥

त्रिवृत्पर्णी, स्त्री, (त्रीन् दोषान् नाशकत्वेन वृणोति प्राप्नोतीति त्रिवृत् त्रिदोषघ्नम् । त्रिवृत् पर्णं यस्याः । ङीप् ।) हिलमोचिका । इति शब्दचन्द्रिका ॥ (हिलमोचिकाशब्दे विवृतिरस्या ज्ञेया ॥)

त्रिवृता, स्त्री, (त्रिभिरवयवैर्वृता ।) त्रिवृत् । इत्यमरः । २ । ४ । १०८ ॥ (अस्याः पर्य्यायो यथा,—
"त्रिभण्डी त्रिवृता श्यामा सरला कोटरा तथा ।
सर्व्वानुभूतिः सुवहा शब्दैः पर्य्यायवाचकैः ॥"
"त्र्यूषणं त्रिफला हिङ्गु कार्षिकं त्रिवृतापलम् ।
सौवर्च्चलार्द्धकर्षञ्च पलार्द्धं चाम्लवेतसात् ॥
तच्चूर्णं शर्करातुल्यं मद्येनाम्बेन वा पिबेत् ।
गुल्मपार्श्वार्त्तिनुत् सिद्धं जीर्णे चाद्याद्रसौदनम् ॥"
"तुल्यार्द्धं त्रिवृताकल्कं सिद्धं गुल्महरं हृतम् ।
मूलं श्यामात्रिवृतयोः पचेदामलकैः सह ।
जले तेन कषायेण पक्त्वा सर्पिः पिबेन्नरः ॥"
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥)

त्रिवेणी, स्त्री, (तिस्रो वेण्यः वारिप्रवाहा वियुक्ताः संयुक्ता वा यत्र ।) स्थानविशेषः । यत्र गङ्गया यमुनासरस्वत्योर्व्वियोगः । सा दक्षिणप्रयागः । तस्य सीमनिर्णयः । यथा,—
"प्रद्युम्नस्य ह्रदात् याम्ये सरस्वत्यास्तथोत्तरे ।
तद्दक्षिणप्रयागस्तु गङ्गातो यमुना मता ॥"
इति प्रायश्चित्ततत्त्वम् ॥
इयं मुक्तवेणीति कथ्यते । प्रयागे युक्तवेणी ॥ (अत्र गङ्गया यमुनासरस्वत्योः सङ्गमात् ॥ ॥ हठयोगोक्तेड़ापिङ्गलासुषुम्नारूपपारिभाषिकनदीत्रयसङ्गमस्थानम् । यथा, हठयोगप्रदीपिकायाम् । ३ । २४ ।
"कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः ॥"
इदन्तत्वाद्वा ङीबिति त्रिवेणिरपि पाठः ॥)

त्रिवेला, स्त्री, (तिस्रो वेला अवयवसीमानो यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥

त्रिशङ्कुः, पुं, (त्रीणि शङ्कूनि अतिक्रमाणि यस्य ।) सूर्य्यवंशीयराजविशेषः । स तु इक्ष्वाकुवंशोद्भवपृथुराजपुत्रः । (अस्य नामनिरुक्तिर्यथा, हरिवंशे । १३ । १९ ।
"एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ॥")